रोल नं. ....................

# 1022-B

## कक्षा 10वीं त्रैमासिक परीक्षा, 2022-23

## संस्कृत—12

## (माध्यम हिन्दी)

(कुल प्रश्नों की संख्या : 23) (कुल मुद्रित पृष्ठों की संख्या : 08)

(समय : 03 घण्टे) (पूर्णांक : 75)

---

*निर्देशाः —*

***(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।***

***(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।***

प्र.1 उचितं विकल्पं चित्वा लिखत — (1×6=6)

(i) 'बालिकया' पदे विभक्तिः अस्ति —

(अ) तृतीया (ब) चतुर्थी (स) षष्ठी (द) सप्तमी

(ii) 'पुस्तक' शब्दस्य द्वितीया विभक्तेः एकवचनं भविष्यति —

(अ) पुस्तकः (ब) पुस्तकं (स) पुस्तकस्य (द) पुस्तके

(iii) 'नदीनाम्' पदे विभक्तिः अस्ति —

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) षष्ठी

(iv) 'कस्मात्' पदे विभक्तिः अस्ति —

(अ) द्वितीया (ब) चतुर्थी (स) पञ्चमी (द) सप्तमी

(v) 'विद्या माता इव रक्षति'। अस्मिन् वाक्ये अव्ययपदम् अस्ति —

(अ) विद्या (ब) माता (स) इव (द) रक्षति

(vi) अधोलिखितेषु अव्ययपदम् अस्ति —

(अ) पत्र (ब) कुत्र (स) सत्र (द) सूत्र

www.rajeshsir.co.in

प्र.2 कोष्ठके प्रदत्तपदेषु रिक्तस्थानापूर्तिं कुरुत – (1×6=6)

(i) 'गच्छन्तु' इत्यस्मिन् पदे ........बहुवचन........वचनम् अस्ति। (एकवचनं / द्विवचनं)

(ii) 'वदामि' इत्यस्मिन् पदे ........................धातुः अस्ति। (वाद् / वद्)

(iii) 'पचेयुः' इत्यस्मिन् पदे ........................लकारः अस्ति। (लट् / लोट् / विधिलिङ्)

(iv) 'लृट्' लकारस्य उदाहरणं ........................अस्ति। (पठिष्यति / पठति)

(v) 'अधिकारः' पदे ........................उपसर्गः अस्ति। (अधि / अधिक)

(vi) 'पराजयः' पदे........................उपसर्गः अस्ति। (पर / परा)

प्र.3 उचितयुग्मेलनं कुरुत – (1×6=6)

| (अ) | (ब) |
|---|---|
| (i) महा + इन्द्रः | (क) जगत् + ईशः |
| (ii) जगदीशः | (ख) महापुरुषः |
| (iii) महान् च असौ पुरुषः | (ग) नमः + ते |
| (iv) चन्द्रशेखरः | (घ) महेन्द्रः |
| (v) द्विगुसमासः | (ङ) बहुव्रीहिः |
| (vi) नमस्ते | (च) पञ्चवटी |

प्र.4 एकपदेन उत्तरं लिखत – (1×6=6)

(i) 'क्त्वा' प्रत्ययस्य एकम् उदाहरणं लिखत। पठित्वा

(ii) 'गतवान्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति? क्तवतु क्तवतु

(iii) 'अजा' इत्यस्मिन् पदे कः प्रत्ययः अस्ति? टाप

(iv) अहं कस्मै जीवनं कामये? मानवाय

(v) व्याघ्रः कस्मात् विभेति? मानुषात

(vi) वृषभः कुत्र प्रपात? क्षेत्रे

www.rajeshsir.co.in

प्र.5 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (1×6=6)

(i) 'मूषकः शनैः शनैः चलति'। इत्यस्मिन् वाक्ये मूषकः विशेष्यपदम् अस्ति। आम

(ii) 'श्वेतः अश्वः धावति'। इत्यस्मिन् वाक्य 'श्वेत': विशेषणपदम् अस्ति। आम

(iii) 'वनं' पदस्य पर्यायपदं 'काननम्' अस्ति। आम

(iv) 'पाषाणः' पदस्य पर्यायपदं 'जलम्' अस्ति। न

(v) 'दूषितम्' पदस्य विलोमपदं 'शुद्धम्' अस्ति। आम

(vi) 'बुद्धिमान्' पदस्य विलोमपदं 'विद्वान्' अस्ति। न

प्र.6 अस्माकं पर्यावरणे किं किं दूषितम् अस्ति? (2)

**अथवा**

लोके महतो भयात् कः मुच्यते?

प्र.7 बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता? (2)

**अथवा**

स्वस्थजीवनाय कीदृशे वातावरणे भ्रमणीयम्?

प्र.8 बालभावात् हिमकरः कुत्र विराजते? (2)

**अथवा**

कस्मात् कारणात् महानगरेषु संसरणं कठिनं वर्तते?

प्र.9 कुशलवयोः वंशस्य कर्त्ता कः? (2)

**अथवा**

व्याघ्रः किं विचार्य पलायितः?

www.rajeshsir.co.in

प्र.10 रामः लवकुशौ कुत्र उपवेशयितुं कथयति? (2)

**अथवा**

कविः किमर्थं प्रकृतेः शरणम् इच्छति?

प्र.11 रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत (कोऽपि द्वे) – (2)

(i) त्वं <u>मानुषात्</u> विभेषि।

(ii) बुद्धिमती <u>चपेटया</u> पुत्रौ प्रहृतवती।

(iii) उद्याने <u>पक्षिणां</u> कलरवं चेतः प्रसादयति।

प्र.12 अधोलिखितानि वाक्यानि कः कं प्रति कथयति (कोऽपि द्वे) लिखत – (2)

(i) जानाम्यहं तस्य नामधेयम्।

(ii) तस्याः द्वे नाम्नी।

(iii) वयस्य! अपूर्वं खलु नामधेयम्।

प्र.13 अधोलिखितानां वाक्यानां निर्देशानुसारं वाच्यपरिवर्तनं कुरुत (कोऽपि द्वे) – (2)

(i) रामः पत्रं लिखति। (कर्मवाच्ये)

(ii) बालकेन गृहं गम्यते। (कर्तृवाच्ये)

(iii) छात्रेण हस्यते। (कर्तृवाच्ये)

www.rajeshsir.co.in

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य एकं सुभाषितश्लोकं लिखत। (2)

प्र.15 अधोलिखितेषु अशुद्धवाक्येषु वाक्यंशुद्धिं कुरुत (कोऽपि द्वे) – (2)

(i) कृषकः ग्रामे गच्छति।

(ii) छात्राः विद्यालये पठति।

(iii) अहं जलं पिबति।

प्र.16 प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत (कोऽपि चत्वारः) – (½×4=2)

(सदा, भृशं, बहिः, अत्र, एव)

(i) इदानीं वायुमण्डलं ..............................प्रदूषितमस्ति।

(ii) ..................................समयस्य सदुपयोगः करणीयः।

(iii) पर्यावरणस्य संरक्षणम् ....................प्रकृतेः आराधना।

(iv) भूकम्पित–समये ....................गमनमेव उचितं भवति।

(v) ................................................जीवनं दुर्वहम अस्ति।

प्र.17 प्रदत्तवाक्यैः कथाक्रमसंयोजनं कुरुत – (½×4=2)

(i) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(ii) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(iii) प्रत्युत्पन्नमतिः सा श्रृगालम् अक्षिपन्ती उवाच।

(iv) गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।



www.rajeshsir.co.in

प्र.18 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – (3)

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यक कार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

(i) राजपुत्रस्य नाम किम्?

(ii) मार्गे सा कं ददर्श?

(iii) ग्रामस्य नाम किम्?

**अथवा**

यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। स व्याघ्रः तथा कृत्वा काननं ययौ। श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती–जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्?

(i) व्याघ्रः कुत्र ययौ?

(ii) कं दृष्ट्वा बुद्धिमती चिन्तितवती?

(iii) बुद्धिमती किं चिन्तितवती?

प्र.19 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – (3)

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्।
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।।

(i) केषाम् अनन्ताः पङ्क्तयः नगरे दृश्यन्ते?

(ii) ध्वानं वितरन्ती का संधावति?

(iii) शतशकटीयानं किं मुञ्चति?



www.rajeshsir.co.in

**अथवा**

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।

पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।।

मानवाय जीवनं कामये नो जीवनमरणम्।

(i) का सभ्यता निसर्गे न समाविष्टा स्यात्?

(ii) कविः मानवाय किं कामये?

(iii) लतातरुगुल्माः कुत्र पिटाः न भवन्तु?

प्र.20 अधोलिखितं नाट्यांशं पठित्वा त्रयाणां प्रश्नानाम् उत्तराणि संस्कृते लिखत – (3)

रामः – अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।

लवः – न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवन तस्य नाम व्यवहरति।

रामः – अहो माहात्म्यम्।

कुशः – जानाम्यहं तस्य नामधेयम्।

रामः – कथ्यताम्।

कुशः – निरनुक्रोशो नाम

रामः – वयस्य, अपूर्वं खलु नामधेयम्।

(i) कः कुशलवयोः पितुः नाम वेदितुम् इच्छति?

(ii) रामस्य नाम कुत्र जनाः न व्यवहरन्ति?

(iii) स्वपितुः नाम कः न जानाति।

(iv) कुशः स्वपितुः नाम किम् अकथयत्?

www.rajeshsir.co.in

प्र.21 अधोलिखितं अपठितगद्यांशं सम्यक् पठित्वा चतुराणां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (4)

स्वस्थ शरीरे एव स्वस्था बुद्धिः वसति। स्वस्था बुद्धिः एव स्वस्थ विचाराणां जननी अस्ति। व्यायामशीलः मनुष्यः एव नीरोगः चिरंजीवी च भवति। व्यायामशीलाः मनुष्याः प्रायेणः रुग्णा न भवन्ति। विविधरोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अतः जीवनस्य कृते व्यायामः परमावश्यकः।

(i) स्वस्थाबुद्धिः कुत्र वसति?

(ii) स्वस्थाबुद्धिः केषां जननी अस्ति?

(iii) कीदृशः मनुष्यः निरोगः चिरंजीवी च भवति?

(iv) विविधरोगाणां चिकित्सा केन सम्भवति?

(v) जीवनस्य कृते परमावश्यकः कः?

प्र.22 स्वस्य प्राचार्यास्य कृते अवकाशार्थं प्रार्थनापत्रं संस्कृते लिखत। (4)

**अथवा**

स्वमित्रं प्रति जन्मदिवसस्य शुभकामनापत्रं संस्कृतभाषायां लिखत।

प्र.23 अधोलिखितेषु एकं विषयं स्वीकृत्य दशवाक्येषु संस्कृतभाषायां निबन्ध लिखत– (4)

(i) महाकविः कालिदासः

(ii) अस्माकं देशः

(iii) संस्कृतभाषायाः महत्वम्

(iv) पर्यावरणम्

www.rajeshsir.co.in